# राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः
( मानवसंसाधानविकासमन्त्रालयाधीनः, भारतसर्वकारस्य तत्त्वावधाने संचालितः )
राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा 'ए' श्रेण्या प्रत्यायितः
56-57, सांस्थानिकक्षेत्रम्,
जनकपुरी, नवदेहली-110 058

## संस्कृतशिक्षायाः विकासयोजनायाः अन्तर्गततया 2019-2020 वर्षे छात्रवृत्तिप्रदानाय पाठशालासु/ महाविद्यालयेषु/ माध्यमिक/माध्यमिकोन्नत-विद्यालयेषु/कलाशालासु अध्ययनरतेभ्यः छात्रेभ्यः ऑनलाईन्-आवेदनार्थं सूचना

संस्कृतभाषायाः प्रचारप्रसाराय मानवसंसाधानविकासमन्त्रालयस्य भारतसर्वकारस्य तत्त्वावधाने सञ्चालितं राष्ट्रियसंस्कृतसंस्थानं (मानितविश्वविद्यालयः), नवदेहली संस्कृतशिक्षायाः विकासयोजनायाः अन्तर्गततया छात्रेभ्यः मेधावीछात्रवृत्तिं ददाति। एतदुपलक्ष्य परम्परागतधारायां मान्यताप्राप्तेषु संस्कृतविद्यालयेषु/पाठशालासु/संस्कृतमहाविद्यालयेषु/संस्कृतविश्वविद्यालयेषु तथा आधुनिकधारायां मान्यताप्राप्तेषु माध्यमिकविद्यालयेषु/महाविद्यालयेषु/विश्वविद्यालयेषु च पूर्वमध्यमा(प्रथमवर्षम्)/नवमकक्षा, पूर्वमध्यमा(द्वितीयवर्षम्)/ दशमकक्षा, उत्तरमध्यमा/प्राक्शास्त्री(प्रथमवर्षम्)/एकादशकक्षा, उत्तरमध्यमा/प्राक्शास्त्री(द्वितीयवर्षम्)/द्वादशकक्षा, शास्त्री/बी.ए.(प्रथम/द्वितीय/तृतीय-वर्षम्), आचार्यः/एम.ए.(प्रथम/द्वितीय-वर्षम्) तथा विद्यावारिधिः/पी.एचडी. पाठ्यक्रमेषु अथवा तत्तत्समपाठ्यक्रमेषु वा संस्कृत/पालि/प्राकृत-भाषां मुख्यविषयरूपेण अथवा ऐच्छिकविषयरूपेण स्वीकृत्य नियमिताध्ययनरतानां/प्रवेशित-छात्राणां कृते छात्रवृत्तिप्रदानाय राष्ट्रियसंस्कृतसंस्थानस्य www.sanskrit.nic.in अथवा scholarship.rsks.in इति अन्तर्जालसङ्केतमाध्यमेन ऑनलाईन्-आवेदनपत्रम् आमन्त्रयते।

- **छात्रवृत्तिप्रदानाय आवेदनपत्रं केवलम् ऑनलाईनद्वारा एव स्वीक्रियते। आवेदनपत्रम् अथवा प्रमाणपत्राणि पत्राचारमाध्यमेन अन्यमाध्यमेन वा संस्थानं प्रति प्रेषणस्य आवश्यकता नास्ति।**
- **ऑनलाईनद्वारा संस्थानां पञ्जीकरणार्थं तथा संस्थानां विवरणं परिष्कर्तुं तथैव च आनलाईनद्वारा छात्रैः आवेदनं कर्तुम् अपेक्षित-निर्धारिततिथयः -**

| सोपानम् | विस्तृतसूचना | निर्धारिततिथयः | |
|---|---|---|---|
| **1. सोपानम्** (**Step-I**) | सर्वा अपि शैक्षिकसंस्थाः www. sanskrit.nic.in अथवा scholarship.rsks.in इति अन्तर्जालसङ्केतमध्ये ऑनलाईन्-पञ्जीकरणम् तथा संस्थायाः विवरणं परिष्कुर्युः - | पञ्जीकरणार्थम् आरम्भतिथिः 30.7.2019 | पञ्जीकरणार्थम् अन्तिमतिथिः **20.10.2019** |
| **2 सोपानम्** (**Step-II**) | सम्बद्धसंस्थानां नाम छात्राणां ऑनलाईन-आवेदनपत्रे प्रदर्शनात् परं छात्रः छात्रवृत्त्यर्थम् www. sanskrit.nic.in अथवा scholarship.rsks.in इति जालपुटे ऑनलाईन्-आवेदनं कर्तुं शक्नोति। | छात्रवृत्तेः आवेदनार्थम् आरम्भतिथिः **30.7.2019** | छात्रवृत्तेः आवेदनार्थम् अन्तिमतिथिः **31.10.2019** |

- **छात्रवृत्त्यावेदनार्थम् अर्हता, नियमाः, आवश्यकप्रमाणपत्राणि इत्यादीनां विस्तृतविवरणार्थं संस्थानस्य** www. sanskrit.nic.in **अथवा** scholarship.rsks.in **इति अन्तर्जालसङ्केतम् अवलोकयन्तु।**

***कुलसचिवः***